श्रीसोमनाथसंस्कृतविश्वविद्यालयग्रन्थमाला-१०

# वाक्यार्थज्योतिः
# Vākyārthajyotiḥ

अङ्कः - 2 वर्षः - 2015-16

प्रधानसम्पादकः
प्रो. अर्कनाथचौधरी

सम्पादकौ
डॉ. पङ्कजकुमारः रावलः
डॉ. शत्रुघ्नपाणिग्राही

श्रीसोमनाथसंस्कृतयुनिवर्सिटी
वेरावलम्

Scanned with CamScanner

प्रकाशकः -

**प्रो. महेन्द्रकुमारः दवे**
का.कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी
राजेन्द्रभुवनरोड, वेरावलम् - ३६२ २६६
गीर-सोमनाथजनपदम्, गुजरातम्
दूरभाष : ०२८७६-२४४५३२, फेक्सः २४४४१७
www.sssu.ac.in

**सहसम्पादकः समन्वयकश्च -**
डॉ. कार्तिकपण्ड्या
संशोधनाधिकारी
श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

© *Shree Somnath Sanskrit University, Veraval* - 2018

**प्रथमं संस्करणम्** - मई - २०१८

**प्रतयः** - ३५०

**ISBN** - 978-93-83097-27-2

**मूल्यम्** - रु. २०० /-

**मुद्रकः** - जलाराम ग्राफिक्स एन्ड ओफसेट
परमहंस अेपार्टमेन्ट के पास,
होटल कावेरी के पीछे, एस.टी.रोड, वेरावल-३६२ २६६
जि. गीर सोमनाथ, गुजरात (भारत)
दूरभाष : (०२८७६) २२१८६१

# रम्या रामायणी कथा

प्रो. महेन्द्रकुमार: अं.दवे

कुलसचिव: (I/C)

श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

सविस्तृतेऽपि प्राक्तने च संस्कृतसाहित्ये महर्षिवाल्मीकिः आदिकवित्वेन प्रतिष्ठितस्तदिया च रम्या रामायणी रचना आदिकाव्यपदमलङ्करोतीति नात्र विसंवाद: विद्वत्सु । किन्तु रामायण-कथाया: रमत्वं किम् ? नलचम्पूकार: त्रिविक्रमभट्ट: तस्य कथाया: रमणीय हेतुभूतं निर्दोषत्वं, सुकोमलत्वं इति कारणंद्वयं निर्दिशति यथा-

सदूषणाऽपि निर्दोषा सखराऽपि सुकोमला ।

नमस्तस्यै कृता येन ,रम्या रामायणी कथा ॥ [१]

रामायणी कथेयं सुकोमलेति, अत्र कोमलानां प्रमादगुणमयानां वाहुल्येन प्रयोग उपलभ्यत इति कृत्वा सुकोमलेत्युक्ता । इदमपि वक्तुम् शक्यते यत् रामायणी कथा सर्वथा दोषरहितेन सुकोमलेन च रामचरित्रेण संवलिता,अत एव रम्या सहृदय उन्मादिनीति ।

वाल्मीकिरामायणस्य आदिकाव्यत्वम् -

रामायणस्य वैशिट्यम् वृहत्धर्मपुराणेऽपि निरूपयति यथा-

पठ रामायणं व्यास: काव्यबीजं सनातनम् ।

यत्र रामचरितं स्यात् तदहं तत्र शक्तिमान् ॥

रामायणं पठितं मे प्रसन्नोऽस्मि कृतस्त्वया ।

करिष्यामि पुराणानि महाभारतमेव च ॥ [२]



स्कन्दपुराणस्योत्तरखण्डे नारद-सनत्कुमारसंवादे पञ्चषु अध्यायेषु विस्तरेण वर्णितमस्ति वाल्मीकिरामायणस्य माहात्म्यं, एवं च महाभारते वनपर्वणि रामोपाख्यानम् रामायणाधारितमेव वर्तते । द्रोणपर्वणि अपि रामायणस्य उल्लेखः प्राप्यते ।यथा-

अपि चायं पुरा गीत: श्लोको वाल्मीकिना भुवि ।

न हन्तव्या: स्त्रियश्चेति यद् ब्रवीषिप्लवङ्गम ॥

सर्वकालं मनुष्येण व्यवसायवता सदा

पीडाकरममित्राणां यच्च कर्तव्यमेव तत् ॥ [३]

अग्निपुराणे पञ्चमाध्यायात् त्रयोदशाध्यायपर्यन्तं नारद-वाल्मीकिसंवाद:निर्देशपुरस्सरं रामायणकथासार: संगृहितो: वर्तते। यथा-

रामायणमहं वक्ष्ये नारदेनोदितं पुरा ।

वाल्मीकये यथा तद् वत् पठितं भुक्तिमुक्तिदम् ॥ [४]

रामायणस्य सर्जकस्य वाल्मीके: जीवनविषये अपि चर्चा आवश्यकी वर्तते। महर्षिवाल्मीके: पिता प्रचेता आसीत्। स्कन्दपुराणेऽस्य विषये वर्णनं प्राप्यते । यत् 'अयं वाल्मीकि: जन्मान्तरे व्याध: आसीत् । तत्र व्याधजन्मनि शंखमुनि: सङ्गाद् रामनामजपेनायं जन्मान्तरे अग्निशर्मा ब्राह्मणोऽभवत् । मतान्तरेण रत्नाकर: नाम अपि प्राप्यते । अस्मिन् जन्मन्यपि प्राक्तसंस्कारादयं व्याधकर्मण्येव व्यासक्तोऽभूत् । तदनन्तरं सप्तर्षिसङ्गात् 'मरामरा' इति जपित्वा तपस्यासमये वल्मीकावृत्तशरीरत्वादयं 'वाल्मीकिरिति नामधेयेन जगति प्रसिद्ध प्राप्ता।

रामायणं भारतस्य राष्ट्रियं महाकाव्यमस्ति । महाकाव्यमिदं भारतीयानां संस्कृतिं प्रतिनिधत्ते । अत्र लोकरामस्य नयनाभिरामस्य

Scanned with CamScanner

श्रीरामचन्द्रस्य एवं सीतयाः प्रमुखरूपेण चरितं चित्रितमस्ति । रामायणे विविधानि विशिष्टानि तथ्यानि विलसन्ति । रामायणस्य भाषा तु सरला, मधुरा, रुचिरा, रसपेशला प्रसाद-माधुर्यगुणोपेता चास्ति । अत्र विविधाः विषयाः व्यवहारमुखेन प्रतिपादिताः सन्ति । सहृदयैः कोविदैरस्य आदिकाव्यस्य प्रशंसा कृता ।

सामान्येन कस्यचिदपि काव्यस्याकलने प्रवर्तमाने विद्वांसः पूर्वाचार्यैः निर्दिष्टां काव्यालोचनपद्धतिमेवाश्रित्य तस्य गुणान् दोषान् च आचक्षते । वस्तुतः मान्याऽपि सा पद्धतिर्वाल्मीकिये रामायणे विचार्यमाणे अस्माकं विचारेण तथा नोपयोगितामावहति । तथा कालिदासप्रभृतीनां काव्यस्य गुणदोषादीनाम् आलोचनार्थमुपयोक्तुं शक्यते ।यतः रामायणमहाभारतादीन् महनीयान् काव्यग्रन्थान् आकलय्यैव महाकाव्यादयो विधाः, नैके च कवितानिर्माणनियमा उद्भाविता आचार्यैः । रामायणस्य कविर्न कोऽपि साधारणपुरुषः । स तु तपः स्वाध्यायनिरतस्तपस्वी, वाग्वेत्ता, धर्मवेत्ता ऋषिर्वर्तते । सोऽस्ति ब्रह्मवेत्ता मुनिपुङ्गवश्च । तदीया काचिदपि वाग् अनृता भवितुं न शक्नोति । तदीयं काव्यं न कृत्रिमम् । तत्तु करुणरसक्षालितसर्वकल्मषतया नितान्तस्वच्छान्तः करुणात्समुल्लिसितं ब्रह्मणा प्रचोदितश्च काव्यं वर्तते । रामायणे प्रधानरसः करुणोऽस्ति । आनन्दवर्धनोऽपि कथयति यत्-

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्व वियोगोत्थः शोकः श्लोकत्वमागतः ॥ [५]

मा निषादात् आरभ्य श्रीरामचन्द्रस्य वनगमनं,[६] राज्ञो दशरथस्य स्वर्गगमनं, सीतानिर्वासनम्,[७] तस्याः भूमौ समाधिः एते प्रसङ्गाः करुणरसं प्रस्तुवन्ति । सीता परित्यागे रामस्य पीडावर्णनं भवभूति निरूपयति । यत्-



अनिर्मिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।
पुटपाकप्रतीकाशो रामस्य करुणोरसः ॥ [८]

रामायणे रामस्य चित्रणम् मानुषःरामः रूपेणाऽपि वर्णितमस्ति । सुन्दरकाण्डे कथयति "मानुषो राघवो राजन्"[९] वस्तुतः मानुषस्य रामस्य चरितं सहजतया प्रभावमुत्पादयति न तथा विष्णोरथवा तस्यावतार रूपस्य रामस्य । यदि सीता विरहजन्यं रुदितं तस्य नरलीलात्वेन प्रतीयते । तदा कृत्रिमत्वारोपेण न तस्मिन् कथञ्चित् कथायाः रमणीयत्व प्रयोजकश्चमत्कारानुभवः शक्यते कर्तुम् ।

इदमेव कारणं यदिदानीतना विद्वांसोऽपि रामस्य मानुषत्वम् अधिश्रित्य विचारपरायणा दृश्यन्ते । स्वयं रामोऽप्यात्मानं मानुषं मन्यते यथा च तेनोक्तम्-

"आत्मानं मानुषं मन्ये रामदशरथात्मजम् ।"[१०]

रामस्य गुणा यथावसरं रामायणे रामस्यचरित्रे समुपवर्णिताः सन्ति । यथा अयोध्याकाण्डे कथयति-

स च नित्यं प्रशान्तात्मा मृदुपूर्वञ्च भाषते ।
उच्चमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥
कदाचिदुपकारेण कृतेनैकेन तुष्यति ।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ [११]

अत्र रामस्य प्रशान्तमत्त्वं, मृदुपूर्णभाषित्वं, कृतज्ञत्वमात्मवत्त्वम् च इति गुणाः उक्ताः । रामस्य श्वः यौवराज्यपदे अभिषेको भविष्यति इति दशरथः आज्ञापयति । तदन्नतरं सुमन्त्रः रामस्य समीपे आगत्य कैकेयाः रामस्य चतुर्दशवर्षाणि यावत् वने निवेसनार्थम् आदेशं सूचयति । अप्रियमपि कैकेय्या वचनमाकर्ण्य रामः विचलितः न भवति । वदति च

Scanned with CamScanner

एवमस्तु गमिष्यामि वनं वस्तुमहंत्वितः ।

जटाचीरधरो राज्ञा प्रतिज्ञामनुपालयन् ॥ [१२]

अत्र रामस्य उदारचरितस्य दर्शनं भवति । कैकयी वनवासं प्रेषितुम् इच्छति तथाऽपि रामः विचलितः न भवति । तत्र रामस्य उदारता दृष्टिगोचरो भवति । रामः अतीव सरलतया पितुः आज्ञां स्वीकरोति । कालिदासोऽपि रामस्य चरितस्य विषये रघुवंशे कथयति यत्-

पित्रा दत्तां रुदन् रामः प्राङ् महीं प्रत्यपद्यत ।

पश्चाद् वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ॥

दधतो मङ्गलक्षौमे वसानस्य च वल्कले ।

ददृशुर्विस्मितास्तस्य मुखरागं समं जनाः ॥ [१३]

सत्यम् .अपि एवं मनुष्यस्य स्वभाविकीं स्थितम् आदिकविः न विस्मरति ,अत एव मातुः कौशल्यायाः भवने रामस्य प्रवेशावसरे स लिखति –

धारयन् मनसा दुःखमिन्द्रियाणि निगृह्य च । [१४]

पितुरादेशं शिरोधार्य राज्यं तृणमिव मत्वा परित्यज्य रामः वनं गन्तुम् तु इच्छति । किन्तु रामः वनेषु नानाभयकारणैः सीतां वनं नेतुं न इच्छति । तदा सा कथयति-

किं त्वामन्यत वैदेहः पिता मे मिथिलाधिप : ।

राम ! जामान्तरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥

अयोध्याकाण्ड-३०-०३

अपि च –

स्वयन्तु भार्या कौमारीं चिरमध्युषितां सतीम् ।



शैलूष इव मां राम परेभ्यो दातुमिच्छति ॥ [१५]

सीता तु स्वधर्मेण रामेण सह वनं गन्तुम् आग्रहं करोति । अत्र केचन् जनाः सीतायाः स्त्रीहठ इति मन्यन्ते । परंतु सति सीतायाः कृते अत्र पतिनिष्ठा एव दृष्टिगोचरो भवति । रामः सुमन्त्रप्रेरितेन रथेन सीता-लक्ष्मणाभ्यां साकं वनाय प्रस्थितः। इदम् दृश्यम् समधिकतया कारुण्यजनकं भवति एव । वनवासस्य प्रथमरात्रौ रामः अयोध्यां स्मरति ,अपि च पितरं मातरं चापि स्मरति । आशङ्क्ते च –

पितरञ्चानुशोचामि मातरञ्च यशस्विनीम् ।

अपि नान्धौ भवेतां नौ रुदन्तौ तावभीक्ष्णशः ॥ [१६]

नैसर्गिकी आशङ्का तस्य मनुष्यस्य इति । कैकेय्यामपि आशङ्का सर्वथा स्वाभाविकी वर्तते ।अतः लक्ष्मणः शीघ्रम् अयोध्यां गन्तुम् निर्देशं प्राप्यते –

क्षुद्रकर्मा हि कैकेयी द्वेषादन्यायमाचरेत् ।

परिदद्याद् हि धर्मज्ञ गरं ते मम मातरम् ॥ [१७]

अत्र रामस्य तात्पर्यं कैकेय्याः निन्दायाः नास्ति । किन्तु लक्ष्मणं-अयोध्यां प्रेषितुम् एव अस्ति । मनुष्यस्य अयं स्वभावो यत् स्वमन्तर्हितं गोपितं भावं कदाचित् प्रकाशे आनयतीति। यदा रावणेन सीता हृता , तदाऽपि रुदन् रामो लक्ष्मणमेवं कथयति –

सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि ।

कच्चित् सकामा कैकेयी सुखिता सा भविष्यति ॥ [१८]

स्वभार्यायाः कारणेन रामस्य गोपितः क्रोधः स्फुटतामवाप्त ? इति वक्तुं शक्यते । परंतु रामस्य रामत्वविषये शंका नास्ति एव । सीतापहरणप्रसङ्गे स उन्मत्तो भूत्वा नानावृक्षान्,मृगं,गजं ,शार्दूलञ्च

Scanned with CamScanner

गिरिप्रस्रवणानि च ।

...परिसंस्थित : ॥ [१९]

...रामः निर्जीवः इव व्यवहारं करोति । अत्र ...उन्मादकस्य निर्देशोः दृश्यते । किरातार्जुनीये अपि ...

...केशवमभ्युपैति,द्रुतं नदी सागरमभ्युपेति ।

...घनमभ्युपैति,कान्ता सकामा प्रियमभ्युपैति ॥ [२०]

सीताविरहे रामः शोकमग्नो भवति । सः प्रियाया ...अनुशोचति, अन्यश्च प्राप्तायाम् अपि सीतायां भोगपरायणःसन् व्याकुलो भवति । विरहे दाम्पत्यरागो सम्पन्नो भवति । किन्तु रामस्य एतादृशः विरहः रामस्य जीवने काठिन्यं ददाति । रामायणस्य रमणीयता प्राप्यते त्रिजटा,हनुमान्, विभीषणादि अन्यानि पात्राणि अपि विलक्षणानि एव प्रतिभाति । हनुमान् सीतायाः अन्वेषणं कृत्वा रामस्य विरहावस्थां प्रति प्राणं संचरयति । वानरशिरोमणिहनुमतो यशोवर्णनं रामायणस्य सुन्दरकाण्डे प्राप्यते । सुन्दरकाण्डः तु रामायणस्य हृदयम् । नष्टद्रव्यस्य लाभो हि सोन्दरः परिकीर्तित इति अपहृतायाः सीतायाः अस्मिन् काण्डे संपूर्णः वृत्तान्तः उपलब्धः इति मत्वा अस्य काण्डस्य नाम सुन्दरकाण्डम् इति भवति । सुन्दरशव्दस्य पर्यायवाचीशव्द वानरःअपि भवति । रामस्य दूतो भूत्वा हनुमान् यदा लंकायां गच्छति तदा तस्य पराक्रमं दृष्ट्वा रावणः अपि भयभितो भवति । रामेण सह युद्धस्य पूर्वे एतादृशी भयभीतता आवश्यकी अपि वर्तते । रामायणस्य रमणीयता विषये अति कथनस्य का आवश्यकता ? रामायणशब्दे एव रमणीयत्वं -आनदत्वं इति अर्थबोधो प्राप्यते । रामायणी कथा न केवलं रम्या,परं



रम्यतरेति वक्तुं शक्यते । रामायणस्य काव्यरसामृतं निर्णीय मनुष्यः परं पदं प्राप्तुं शक्नोति । कथयति यत्-

वाल्मीकिः कविसिंहस्य कविता वनचारिणः ।

श्रृण्वन् रामकथानादं को न याति परं पदम् ॥

रामायणस्य कथा अधिकी रमणीया वर्तते । रामायणस्य पात्रनिरूपणम् अपि दिव्यं वर्तते । तस्मिन् प्रेम्णः स्वरूपं दृश्यते ,रामायणस्य एकं पात्रं तादृशं नास्ति, यस्मिन् कोऽपि विचारः हकारात्मकः न स्यात् । यथा भगवान् राम आदर्शः पुत्रः पतिः इत्यादय तु अस्ति एव किन्तु परिवारस्य अपि त्यागं कर्तुं शक्नोति ।तादृशः प्रजापालकः राजा अपि अस्ति । एतादृशः नृपः दुर्लभः एव । विपुलां धनसंपत्तिं तिरस्कर्तृन् भरतः भ्रातृप्रेम्णः उत्तममुदाहरणं वर्तते । भ्रातृसेवार्थं सदैव तिष्ठन् लक्ष्मणः अपि अविस्मरणीयः वर्तते । वचनपालनार्थं स्वस्य प्राणत्यजति । तादृश इन्द्रस्य सन्माननीयं मित्रं दशरथः अपि मनुष्येभ्यः "रघुकुल रीति सदा चली आई, प्राण जाय अरु वचन न जाय " इति अद्यापि शिक्षयति । सीतायाः तु पात्रं सतिनारीसु पुण्यश्लोकरूपं वर्तते । एवं प्रातःस्मरणीय-सन्नारीसु स्थानं प्राप्नोति । यथा --

सीता तारा मन्दोदरी अहल्या द्रौपदी तथा ।

पञ्चकन्या स्मरेन्नित्यं महापातकनाशनम् ॥

कापि परिस्थितिः भवेत्,पतेः अर्धांगिनीरूपेण सा सदैव तिष्ठति । राज्यस्य वैभवं त्यक्त्वा पतेः कार्ये सहायिनी भवति । सा अरण्यस्य कष्टानि सहते, राक्षसराजस्य अपमानं सहनं करोति एवं अन्ते असंत्यं,कटुवचनं, अपवादं सहनं कृत्वा अरण्ये निवसति । अत्र एतादृशी प्रेरणा अपि प्राप्यते यत् वयं सम्पूर्णतया सत्यस्वरूपाः एव भवामः तदपि जनाः सत्यस्य स्वीकारं न कुर्वन्ति । तदा प्रतिकारः न करणीयः यतोहि

वयं गृहस्थाः, न तु योद्धारः, अतः अत्र कर्मणः एव गतिः मन्तव्या।

न केवलं उत्तमानि एव पात्राणि अस्मान् मार्गदर्शयन्ति । यानि समाजे उपेक्षितानि पात्राणि अपि सन्ति तानि अपि अस्मान् हकारात्मकं (पोझेटीव) एव उपदेशं ददति । मन्थरायाः पात्रं उपेक्षितं वर्तते किन्तु तस्यामपि स्वीयां स्वामिनीं प्रति अप्रतिमं प्रेम आसीत् । अतः तां प्रति स्नेहभाववसात् एव कैकेयीं प्रति मोहवसात् एव भरताय वचनद्वयस्य प्रास्यर्थं मार्गदर्शयति । सा स्वस्य स्वामिनीं सर्वं गौरवयुक्तमेव द्रष्टुं-मिच्छति । अतः एतादृशं करोति । एषः भावः मनुष्याणां चित्ते भवति एव । रावणः अपि सीताहरणं कृत्वा भगवन्तं स्वराज्ये आनयति । अन्यथा तस्य सम्पूर्णपरिवारः भगवतः दर्शनं न कर्तुं शक्नुयात् । एवं भगवतः दर्शनेन एव मृत्युं प्राप्नोति । वयं जानीमः यत् भगवतः हस्तेन मृत्युः भवेत् तदर्थमपि तपः आवश्यकं भवति । तस्य दृष्टान्तं महाभारते दर्दुरकस्य पात्रे वर्तते एव । अतः रावणस्य कुटुम्बप्रेम अत्र दृश्यते । कुम्भकर्णः अपि रामेण सह विरोधे स्वस्य मृत्युं पश्यति तदपि सः भ्रातृस्नेहवसात् रावणं भ्रातरं न त्यजति । कैकेयी तु प्रायः तिरस्कारयुक्तं पात्रं एव जनाः मन्यन्ते । किन्तु तस्याः त्यागः तु अनन्य वर्तते । सा अपयशं स्वीकृत्य अपि रामं वनं पेषयति । श्रवणस्य पित्रोः शापवसात् दशरथस्य मृत्यु पुत्रवियोगेन एव भविष्यति तादृशं सा जानाति । दशरथस्य मृत्युः अपि सा पश्यति । स्वस्य पुत्रभरतः अयोध्यायां नास्ति । अर्थात् भरतस्य एवं शत्रुघ्नस्य वियोगेन दशरथस्य मृत्युः न भविष्यति । अतः सा रामस्य वियोगं कर्तुं केवलं वनवासम् एव प्रेषयति । एवं तत्रापि रामस्य अवतारस्य प्रयोजनं सिद्धं भवेत् । एतस्य तथ्यस्य सम्यक्तया निरूपणं महाकविना भासेन प्रतिमानाटके कृतं वर्तते । कैकेयाः अतीव महतीं महत्तां दृष्टवा एव भगवान् रामः वनवासानन्तरं आगत्य प्रथमं कैकेयीं मिलति ।

अन्यानि अपि अनेकानि तादृशानि पात्राणि सन्ति । तानि



अस्मान् कुटुम्बस्नेहं शिक्षयति । रामायणस्य एक शब्देन वयं कथनं कर्तुं इच्छामः । तर्हि वक्तुं शक्नुमः यत् रामायण इत्युक्ते प्रेम. (स्नेह) एताः सर्वापि विशेषताः रामायणे यथावसरं यथास्थानञ्च सम्प्राप्यन्ते । नात्र काऽपि आवश्यकता तासां विस्तारस्य ।

*****

सन्दर्भाः

१ नलचम्पूः-१,११

२ बृहत्धर्मपुराणे-प्रथमखण्डे-३०-४७-५१,

३ महाभारतद्रोणपर्वणि-१४३-६७/६८.

४ अग्निपुराणे-५-१

५ आनन्दवर्धनस्य 'ध्वन्यालोके'-प्रथम उद्योत करिका-५

६ अहो निश्चेतनो राजा जीवलोकस्य सम्प्रियम् ।

७ धर्म्यं सत्यव्रतं रामं वनवासे प्रवत्स्यति ॥ वा.रामायणम्- २/३६/६.

८ आरुह्य सीतामारोप्य विषयान्ते समुत्सृज ।

९ गङ्गायास्तु परे पारे वाल्मीकेस्तु महात्मनः ॥ वा.रामायणम्- ६/४५/१७.

१० उत्तररामचरितम् -३-१.

११ रामायणे सुन्दरकाण्डे-५१-२७.

१२ रामायणे-युद्धकाण्डे- ११७-११.

१३ अयोध्याकाण्डम्- १/१०-११.

१४ अयोध्याकाण्डम्- १९/२.

Scanned with CamScanner

१५ रघुवंशम्–१२/७-८.

१६ अयोध्याकाङ्डम्- १९-३५.

१७ अयोध्याकांड-३०-८

१८ अयोध्याकांड-४८-६

१९ अयोध्याकांड-५३-१८

२० अरण्यकाण्डम्-३८-७.

Scanned with CamScanner